# SY-518

**Reg. No. : ......................................**

**Name : ..........................................**

**SECOND YEAR HIGHER SECONDARY EXAMINATION, MARCH 2024**

Part – III

Time : 2½ Hours

## SANSKRIT SAHITYA

Cool-off time : 15 Minutes

**(Optional)**

Maximum : 80 Scores

*निर्देशा :*

- 15 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगम्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र-तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

*നിർദ്ദേശങ്ങൾ :*

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യുന്നതിനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

1-8 प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत ।

**(1 മുതൽ 8 വരെ ചോദ്യങ്ങൾക്ക് ഉത്തരം ബ്രാക്കറ്റിൽ നിന്നും എടുത്തെഴുതുക. 1 സ്കോർ വീതം)** **(8 × 1 = 8)**

1. कुचेलेन उपानीतम् उपायनं किम् ?

   (पृथुकं, वस्त्रं, धनम्)

2. "नाहं शौरिर्न खलु मुसली" – अत्र शौरि इति पदस्य अर्थः कः ?

   (बलरामः, अर्जुनः, श्रीकृष्णः)

3. "अर्थगौरवम्" – इति कस्य विशेषणं भवति ?

   (माघस्य, भारवेः, कालिदासस्य)

4. मृच्छकटिकस्य विदूषकस्य नाम किम् ?

   (वसन्तकः, मैत्रेयः, रामः)

5. नवभारतस्य कर्ता कः ?

   (टागोरः, मुतुकुलंश्रीधरः, भारविः)

6. यत्र विनिर्भयमुदयति ________ ।

   (शिरः, चिन्ता, हृदयं)

7. वरतन्तुशिष्यः कः ?

   (कौत्सः, चारुदत्तः, गान्धिः)

8. ध्वनिसिद्धान्तस्य उपज्ञाता कः ?

   (भरतः, वामनः, आनन्दवर्धनः)

**9 – 12 प्रश्नानाम् उत्तराणि लिखत । प्रत्येकस्य प्रश्नस्य द्वौ अङ्कौ ।**

**(9 മുതൽ 12 വരെ ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. 2 സ്കോർ വീതം)** **(4 × 2 = 8)**

9. प्रदत्तयो: पदच्छेदं लिखत ।

(क) नष्टास्तनूजा: – __________ + ___________ ।

(ख) इत्युच्चै: – __________ + ___________ ।

10. प्रदत्तयो: एकपदं लिखत ।

(क) प्रशमम् अस्य अस्ति इति ।

(ख) द्वि: जायन्ते इति ।

11. सन्धत्त –

(क) शोकाग्नि: + न = __________ ।

(ख) निवास: + चिन्तायां = __________ ।

12. प्रदत्तयो: विग्रहवाक्यं लिखत ।

(क) महितामृतलक्ष्य: ।

(ख) कदर्थितचित्त: ।

**13-15 प्रश्नेषु द्वयो: उत्तरं लिखत । प्रत्येकस्य त्रय: अङ्का: ।**

**(13 മുതൽ 15 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 2 എണ്ണത്തിന് ഉത്തരം എഴുതുക. 3 സ്കോർ വീതം)** **(2 × 3 = 6)**

13. अध: प्रदत्तं गद्यभागं पठित्वा क्त्वान्त–ल्यबन्त – तुमुन्नन्तपदानि चित्वा लिखत ।

श्वेतकेतु: गुरुदक्षिणां दत्वा स्वभवनं प्रतिन्यवर्तत । किन्तु पितु: निर्देशम् अनुसृत्य अन्यत् गुरुकुलं गन्तुम् ऐच्छत् ।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| ..................... | ..................... | ..................... |

14. प्रदत्तं गद्यभागं रेखङ्कितपदानां स्थाने समानार्थकपदानि पेटिकात: चित्वा गद्यभागं पुनर्लिखत ।

इदं काव्यं कवि <u>नाम्ना</u> व्यपदिश्यते । अनेन व्यपदेशेन कवेरस्य <u>अनुपमं</u> प्रतिभा विलासं <u>द्योत्यते</u> ।

| अभिधानेन, अतुल्यं, प्रकाशते, पठनेन |
|---|

15. आशयं पद्यांशेन सह योजयित्वा लिखत ।

| क | | ख | |
|---|---|---|---|
| (1) | राजा विश्वजित् नामकं यागं कृत्वा कोषं शून्यमकरोत् । | (1) | स मृन्मये वीतहिरण्मयत्वात् पात्रे निधायार्घ्यमनर्घशील: ।। |
| (2) | स: तपोधनं विधिवत् अर्चयित्वा स्वीकरोति । | (2) | तमध्वरे विश्वजिति क्षितीशं निश्शेषविश्राणितकोषजातम् । |
| (3) | स: मृन्मयपात्रे अर्घं निधाय । | (3) | तमर्चयित्वा विधिवद्विधिज्ञ: तपोधनं मानधनाग्रयायी । |
| | | (4) | प्रात: प्रयाणाभिमुखाय तस्मै सविस्मय कोशगृहे नियुक्त: । |

**16-19 प्रश्नेषु त्रयाणाम् उत्तराणि लिखत । प्रत्येकं चत्वार: अङ्का: ।**
**(16 മുതൽ 19 വരെ ഉള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 3 എണ്ണത്തിന് ഉത്തരമെഴുതുക. 4 സ്കോർ വീതം)** **(3 × 4 = 12)**

16. अध: प्रदत्तं श्लोकं पठित्वा श्रीकृष्णस्य शासनाकाले द्वारकाया: अवस्थामधिकृत्य एकां टीकां लिखत ।

विहितभुवनभद्रे वसुभद्रे धरित्री
भरहरणविनिद्रे भूरिकारुण्यसान्द्रे ।
न परमखिललोका: द्वारवत्यां जगत्या–
मुदधिवलयवत्यां हृष्टपुष्टा: बभूवु: ।।

17. सूचनां पठित्वा “महितामृतं” नाम पाठभागम् अधिकृत्य एकां टिप्पणीं लिखत ।

**सूचना :**
- नवभारतम्
- भारतस्य स्वातन्त्र्य आन्दोलनम् ।
- महात्मागान्धिन: संघटना प्रवर्तनम् ।

18. अध: प्रदत्तान् सम्भाषणांशान् मलयाल भाषया आङ्गलभाषया वा अनुवदत ।

चारुदत्त: – सखे मैत्रेय:, स्वागतम् आस्यताम्
विदूषक: – यद् अज्ञापयति भवान् (उपविश्य) को विशेष: ।
चारुदत्त: – नूतन: विशेष: नैव अस्ति ।
भवान् कुशली वा ?
विदूषक: – आम् ! भवत: कृते
जातिकुसुमवासिन: चूर्णवृद्धेन प्रवारकमेकम् अनुप्रेषित: ।

19. अध: प्रदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत ।

तवार्हतो नाभिगमेन तृप्तं
मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मनो वा
प्राप्तोऽसि संभावयितुं वनान्माम् ।।

आर्हत: तव ......... मे मन: न ....... किन्तु नियोगक्रियया उत्सुकं मां .......... आत्मनो वा आज्ञया अपि ........ वनात् प्राप्त: असि ।।

**20-24 प्रश्नेषु चतुर्णाम् उत्तराणि लिखत । प्रत्येकस्य पञ्च अङ्का: ।**

**(20 മുതൽ 24 വരെ ഉള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 4 എണ്ണത്തിന് ഉത്തരമെഴുതുക. 5 സ്കോർ വീതം)** **(4 × 5 = 20)**

20. अध: प्रदत्तं पद्यं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

कुचेलनाम भवत: सतीर्थ्यतां
गत: स सन्दीपनिमन्दिरे द्विज: ।
त्वदेकरागेण धनादिनिस्पृहो
दिनानि निन्ये प्रशमी गृहाश्रमी ।।

(क) कुचेल: कस्य सतीर्थ्य: भवति ?

(ख) "गृहाश्रमी" इति पदस्य विग्रहवाक्यं लिखत ।

(ग) कृष्ण – कुचेलयो: कस्य मन्दिरे सतीर्थ्यतां गत: ?

(घ) श्लोकस्य आशयं स्ववाक्यै: लिखत ।

21. यथोचितं योजयत ।

रसपद्धति: – कुन्तक:
अलङ्कारपद्धति: – आनन्दवर्धन:
रीतिपद्धति: – भरतमुनि:
ध्वनिपद्धति: – वामन:
वक्रोक्तिपद्धति: – भामह:

22. अध: प्रदत्तं गद्यभागं पठित्वा प्रश्ननानाम् उत्तराणि लिखत ।

काव्यं गद्यं–पद्यं मिश्रं चेति त्रिविधमस्ति । गद्यसाहित्येषु परमश्रेष्ठं काव्यं भवति कादम्बरी । बाणभट्ट: अस्य कर्ता । "कादम्बरीरसज्ञाने आहारोऽपि न रोचते" इति प्रथाप्रसिद्धमेव । अनन्ताचार्य: कादम्बर्या: पुनराख्यानं कृत्वा 'चन्द्रापीडचरितम्' इति नाम्ना समाकलितम् । श्वेतकेतो: पुत्र: पुण्डरीक: अस्य काव्यस्य नायक: भवति । महाश्वेता अस्य काव्यस्य नायिका च भवति ।

(क) काव्यं कति विधमस्ति ?

(ख) कादम्बर्या: कर्ता क: ?

(ग) कादम्बर्या: पुनराख्यानस्य नाम किम् ?

(घ) पुण्डरीक: कस्य पुत्र: भवति ?

(ङ) कस्या: रसज्ञाने आहारोऽपि न रोचते ?

23. अध: प्रदत्तं गद्यभागं पठित्वा टागोर् महाशयस्य जीवितरूपरेखा (profile) लिखत ।

रवीन्द्रनाथटागोर् महोदय: 1861 तमे वर्षे कोल्क्कत्ता देशे जनिमलभत । पण्डितश्रेष्ठोऽयम् । अस्य प्रमुखा: कर्मरंगा: कला–सांस्कृतिक–साहित्यरचना: च आसीत् । गीताञ्जलि:, मानसि, चित्रांगद: सेनार्तारि चास्य प्रमुखा: कृतय: भवन्ति । 1913 तमे वर्षे तस्य गीताञ्जल्या: नोबल् पुरस्कारेण समादृत: । 1941 तमे वर्षे स: दिवंगत: ।

| **जीवितरूपरेखा (Profile)** | | |
|---|---|---|
| नाम | : | रवीन्द्रनाथटागोर: । |
| जन्मवर्ष: | : | ..................................... । |
| जन्मदेश: | : | ..................................... । |
| कर्मरंगा: | : | ..................................... । |
| कृतय: | : | ..................................... । |
| पुरस्कार: | : | ..................................... । |
| दिवंगतवर्ष: | : | 1941 तमे वर्षे ।। |

24. अध: प्रदत्तं पद्यं पठित्वा सूचनानुसारं व्याख्यानं कुरुत ।

भारता: वयमुदश्चितधैर्यं
व्यूहमाप्य परिपन्थिजनेभ्य: ।
मोक्तुमात्मगुणपुष्टिं यतध्वम्
कीर्तिरिव मनुजेष्वभिकाम्या ।।

**सूचना :** • अन्वय: • अन्वयार्थ: • सार: ।

**25-28 प्रश्नेषु त्रयाणाम् उत्तराणि लिखत । प्रत्येकस्य षट् अङ्काः ।**

**(25 മുതൽ 28 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും മൂന്ന് എണ്ണത്തിന് ഉത്തരം എഴുതുക.**
**6 സ്കോർ വീതം)** **(3 × 6 = 18)**

25. अध: प्रदत्तं श्लोकं पठित्वा सूचनानुसारम् आस्वादनटीकां लिखत ।

तमर्चयित्वा विधिवद्विधिज्ञ:
तपोधनं मानधनाग्रयायी ।
विशाम्पतिर्विष्टरभाजमारात्
कृताञ्जलि: कृत्यविदित्युवाच ।।

**सूचना :** ● आमुखम् ● आशयम् ● आस्वादनम्

26. कथास्तम्भान् क्रमीकुरुत ।

- पठितव्यं त्वया न पठितम् ।
- उपगम्य गुरुकुलं स कुमार: अतीतं सर्वं वृत्तान्तम् अश्रावयत् ।
- गुरुदक्षिणां दत्वा राजधानीं प्रतिन्यवर्तत ।
- यदा अजानां संख्या सहस्राधिकम् उपेष्यति तदा प्रत्यागच्छतु ।
- कौतुकेन हेतुना अजानां गणनां कृतवान् ।
- लोकज्ञस्य मन:शास्त्रनिपुणस्य महीपते: मुखं म्लानम् अभवत् ।

27. अध: प्रदत्तां सूचनां पठित्वा चारुदत्तस्य स्वभावमधिकृत्य एकं लघूपन्यासं लिखत ।

**सूचना:** ● शूद्रकस्य मृच्छकटिकम् ।
● नायक: चारुदत्त: ।
● दारिद्रस्य दुरवस्था ।

28. प्रदत्तं गद्यभागं पठित्वा संगृह्य लिखत ।

संस्कृतसाहित्ये काव्यं गद्यं-पद्यं मिश्रं चेति त्रिधाविभक्तुं शक्यते । गद्यसाहित्ये प्रमुखा: भवन्ति कथाग्रन्था: आख्यायिका: चरित्रकाव्यानि च । कविता मुक्तकानि महाकाव्यानि खण्डकाव्यानि च पद्यसाहित्ये अन्तर्भवन्ति । मिश्रं तु चम्पूकाव्यानि ।

गद्यपद्योभयस्वरूपं काव्यं चम्पूसंज्ञकम् । चम्पूकाव्ये सामान्यकथनं तु गद्येनैव कथ्यते । किन्तु विशेषकथनाय पद्यमाश्रियते । चम्पूकाव्यस्य प्रथमस्वतन्त्ररूपेण त्रिविक्रमभट्टस्य नलचम्पुरेव प्रथममुदेति । यशस्तिलकचम्पू, जीवन्धरचम्पू:, रामायणचम्पू च प्रमुखा: चम्पूग्रन्था: ।

अश्वतितिरुन्नाल् महाभागेन विरचित: प्रशस्त: चम्पूग्रन्थ: भवति सन्तानगोपालम् । श्रीकृष्णस्य शासनाकाले संजाता एका घटना एव अस्य काव्यस्य इतिवृत्तम् । अहङ्कारयुक्त: अर्जुन: तु स्वयं नाशाभिमुखं गच्छतीति ज्ञात्वा कृष्ण: तस्य अहंकारस्य उन्मूलनाशं कर्तुम् उद्यत: । पुन: अर्जुन: निर्मलमानस: सन् जीवितविजयं प्राप्नोति । तदेव सन्तानगोपाल-नामकस्य चम्पूकाव्यस्य सार: ।।

**29-30 प्रश्नयोः एकस्य उत्तरं लिखत । अष्ट अङ्काः ।**

**(29 മുതൽ 30 വരെ ഉള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 1 എണ്ണത്തിന് ഉത്തരം എഴുതുക. 8 സ്കോർ.)** **(1 × 8 = 8)**

29. अध: प्रदत्तां सूचनां पठित्वा बृहत्त्रयीम् अधिकृत्य एकम् उपन्यासं लिखत ।

**सूचना –**
- पञ्चमहाकाव्यम् ।
- किरातार्जुनीयम् ।
- शिशुपालवधम् ।
- नैषधीयचरितम् ।

30. अध: प्रदत्तां सूचनां पठित्वां विचित्ररूपोऽनुग्रह: नाम पाठभागस्य कथां लिखत ।

**सूचना –**
- नारायणीयम् ।
- भार्याया: प्रेरणया कुचेलस्य द्वारकायात्रा ।
- कृष्णकुचेलयो: समागम: ।
- भगवदनुग्रह: ।
- कुचेलस्य सविशेषा भक्ति: ।